## इनच् पिटच् चिक चि च। (३३/१८३४)

नेः इत्येव, नते नासिकायाः इति च। निशब्दान् नासिकाया नतेऽभिधेये इनच् पिटच् इत्येतौ प्रत्ययौ भवतः, तत्संनियोगेन च निशब्दस्य यथासङ्ख्यं चिक चि इत्येतावादेशौ भवतः। चिकिनः, [1]चिपिटः।

[५५५] ककारः प्रत्ययो वक्तव्यश्चिक् च प्रकृत्यादेशः[2]। (म. भा. २. ३७७)

चिक्कः। तथा चोक्तम्–'इनच्पिटच्काश्चिकचिचिकादेशाश्च [3]वक्तव्याः' (म.भा.२. ३७७) इति।

[५५६] क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी। (म. भा. २. ३७७)

क्लिन्नस्य चिल् पिल् इत्येतावादेशौ भवतः [4]लश्च प्रत्ययोऽस्य चक्षुषी इत्येतस्मि[5]न्नर्थे। क्लिन्ने अस्य चक्षुषी चिल्लः, पिल्लः (म. भा. २. ३७७)।

[५५७] [6]चुलादेशो वक्तव्यः। (म. भा. २. ३७७)

चुल्लः। अस्य इत्यनेन नार्थः। चक्षुषोरेवाभिधाने प्रत्यय इष्यते। क्लिन्ने चक्षुषी चिल्ले, पिल्ले, चुल्ले। तद्योगात् तु पुरुषस्तथो[7]च्यते॥

## उपाधिभ्यां त्यकन्नासन्नारूढयोः। (३४/१८३५)

उप अधि इत्येताभ्यां यथासङ्ख्यम् आसन्नारूढयोर्वर्तमानाभ्यां स्वार्थे त्यकन् प्रत्ययो भवति। सञ्ज्ञाधिकाराच्च [8]नियतविषयमासन्नारूढं गम्यते। पर्वतस्य [9]आसन्नम् उपत्यका। तस्यैवारूढम् अधित्यका। प्रत्ययस्थात् कात्पूर्वस्य (७. ३. ४४/४६३) इति इत्वमत्र न भवति, सञ्ज्ञाधिकारादेव॥

## कर्मणि घटोऽठच्। (३५/१८३६)

[10]निर्देशादेव समर्थविभक्तिः। कर्मशब्दात् सप्तमीसमर्थाद् घटः इत्येतस्मिन्नर्थे अठच् प्रत्ययो भवति। घटते इति घटः[11]। कर्मणि घटते कर्मठः पुरुषः[12]॥

## तदस्य सञ्जातं तारकादिभ्य इतच्। (३६/१८३७)

तद् इति प्रथमासमर्थेभ्यस्तारकादिभ्यः शब्देभ्यः अस्य इति षष्ठ्यर्थे इतच् प्रत्ययो भवति। सञ्जातग्रहणं प्रकृतिविशेषणम्। तारकाः सञ्जाता अस्य [13]नभसः तारकितं नभः। पुष्पितो वृक्षः।

तारका। [14]पुष्प। [15]मुकुल। [16]कण्टक। पिपासा। सुख। दुःख। ऋजीष। कुड्मल। सूचक। रोग। विचार। व्याधि। निष्क्रमण। मूत्र। [17]पुरीष। किसलय। [18]कुसुम। प्रचार। [19]तन्द्रा[20]। वेग। पुक्षा। श्रद्धा[21]। उत्कण्ठा। भर। द्रोह[22]। 'गर्भादप्राणिनि' (ग. सू. १२०)। तारकादिराकृतिगणः॥

---

1. चिकिटः ह. 2. वक्तव्यः इत्यधिकम् ह. 3. वक्तव्याः नास्ति ह. 4. लच् ह. 5. अभिधेये फ. 6. चुल्लादेशः क. ह. 7. व्यपदिश्यते क. 8. नियतं ह. 9. आसन्ना भूः ड, आसन्नं समीपं ग. 10. सप्तमी ड. फ. 11. कर्मणि ठक् इत्यधिकम् क. 12. अकारः इकादेशाभावार्थः इत्यधिकम् ड. 13. नभसः नास्ति ह. 14. वृक्ष ह. 15. मञ्जरी फ. 16. इषीक ह. 17. उच्चार ह. 18. स्तबक ह. फ. 19. निद्रा ह. फ. 20. बुभुक्षा इत्यधिकम् ह. 21. अभिषङ्ग अङ्गारक वर्ण इत्यधिकम् ह. 22. व्रण इत्यधिकम् ह.